अनुक्रमाङ्क .............................. कूट सं. : 820143-$SA_1$ (M)

कक्षा - अष्टमी

कृपया जाँच कर लें कि इस प्रश्न-पत्र में कुल 21 प्रश्न हैं और कुल 11 मुद्रित पृष्ठ हैं।

# संस्कृतम्

(सङ्कलनात्मकं मूल्याङ्कनम् - I)

निर्धारित-अवधिः - होरात्रयम् पूर्णाङ्काः - 90

निर्देशाः -

1. अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।
2. प्रतिखण्डम् उत्तराणि पृथक् प्रदत्तायाम् उत्तर पुस्तिकायां लेखनीयानि।
3. प्रत्येकं खण्डम् अधिकृत्य उत्तराणि क्रमेण एव लेखनीयानि।
4. प्रश्नपत्रे उत्तराणि न लेखनीयानि।
5. प्रश्नसङ्ख्या प्रश्नपत्रानुसारं लेखनीया।
6. खण्डसङ्ख्या अपि लेखनीया।

## खण्डः-'क' (अपठित-अवबोधनम्) 5

1. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत -

एकस्मिन् वने एकः मुनिः वसति स्म। सः प्रतिदिनं भिक्षार्थम् इतस्ततः भ्रमति स्म। एकदा सः भिक्षायै एकं गृहम् अगच्छत् यत्र एका महिला अवसत्। सा क्रोधात् एकं विषाक्तं मोदकं तस्मै मुनये अयच्छत्। सः नीत्वा अगच्छत्। अन्यस्मिन् दिने तस्याः महिलायाः पुत्रः वनम् आगच्छत्। सः बुभुक्षितः आसीत्। अतः मुनेः कुटीरं गत्वा सः भोजनम् अयाचत। मुनिः तस्मै तमेव मोदकम् अयच्छत्। भक्षणोपरान्तं सः मृतः। यः यथा करोति सः तथैव फलम् आप्नोति। अतएव सदैव सत्कर्म एव कर्त्तव्यम्।

प्रश्नाः -

(I) एकपदेन उत्तरत - ½×2=1

(i) मुनिः कुत्र अवसत्?

(ii) सदैव किं कर्त्तव्यम्?

(II) पूर्णवाक्येन उत्तरत - 1×2=2

(i) मुनिः प्रतिदिनं किं करोति स्म?

(ii) महिला क्रोधात् किम् अकरोत्?

(III) निर्देशानुसारम् उचितम् उत्तरं चित्वा उत्तरत - ½×4=2

(क) 'आगच्छत्' इति क्रियापदस्य कर्तृपदं किम्?

(i) तस्याः (ii) महिलायाः

(iii) पुत्रः (iv) वनम्

(ख) 'यत्र एका महिला अवसत्' अस्मिन् वाक्ये विशेषणपदं किम् अस्ति?

(i) यत्र (ii) एका

(iii) महिला (iv) अवसत्

(ग) 'आगतः' इति पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम्?

(i) आसीत् (ii) अगच्छत्

(iii) अयाचत (iv) गतः

(घ) 'सः तथैव फलम् आप्नोति' अस्मिन् वाक्ये अव्ययपदं किम् अस्ति?

(i) सः (ii) तथैव/तथा/एव

(iii) फलम् (iv) आप्नोति

## खण्डः-'ख' (रचनात्मक-कार्यम्) (15)

2. अद्यः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तपदानां सहायतया संस्कृतेन पञ्च वाक्यानि लिखत- 1×5=5



मञ्जूषा

| |
|---|
| महिला, कूपः, गृहाणि, बालकः, बालिका, कूपात्, |
| ग्रामस्य, जलम्, घटाः, नयति, गृहम्, पश्यतः |

3. राष्ट्रियसेवायोजनाया शिविरस्य विषये पितरं प्रति लिखिते पत्रे रिक्तस्थानानि मञ्जूषायाः उचितपदानि चित्वा पूरयत, पत्रं च उत्तरपुस्तिकायां पुनः लिखत - ½×10=5

छात्रावासतः

तिथिः ............................

पूजनीय (i) ..........................,

सादरं नमो नमः।

मया भवतः (ii) .......................... प्राप्तम्। अहं किंचित् नूतनं निवेदयामि यत् गत सप्ताहे अस्माकं (iii) .......................... राष्ट्रीयसेवायोजनायाः (iv) .......................... आयोजितम्। अस्माकं कक्षाध्यापिका शिविरस्य प्रमुखा (v) .......................... आसीत्। तस्याः मार्गदर्शने वयं (vi) .......................... गत्वा बालकेभ्यः मिष्टान्नानि (vii) .......................... वस्त्राणि च अयच्छन्। सर्वे अति (viii) .......................... अभवन्। अहम् अत्र (ix) .......................... अस्मि।

मातृचरणेषु मम प्रणामाः निवेदनीयाः।

भवदीयः (x) ..........................

मोहितः

मञ्जूषा :

| |
|---|
| पत्रम्, शिविरम्, अनाथालयं, पितृमहोदया, पुत्रः सकुशलः, पुस्तकानि, आयोजिका, विद्यालये, प्रसन्नाः |

4. अधोलिखितं संवादं पठित्वा मञ्जूषायां प्रदत्तपदैः रिक्तस्थानानि पूरयत - ½×10=5

माता - सुधे! (i) .......................... उभयतः पश्य।

सुधा - किमर्थम्?

माता - किमपि (ii) .......................... तु न आगच्छति?

सुधा - न मातः! किमपि वाहनं न (iii) ..........................।

माता - पश्य, तत्र कारयानं (iv) .......................... आगच्छति।

सुधा - आम्, मातः। पश्यामि।

माता - (उच्चै स्वरेण) हा! पश्य। (तदैव तीव्रगतिवाहनेन एकः जनः पातितः) (v) तेन .......................... एकः पुरुषः आहतः पतितः च।

सुधा - बहवः (vi) .......................... तं पश्यन्ति।

माता - किन्तु, कोऽपि तस्य (vii) .......................... न करोति।

सुधा - मातः! (viii) .......................... तस्य सहायतां कुर्वः।

माता - आगच्छ, तत्र गच्छावः। (तम् उत्थाय) मान्यवर्! अलं चिन्तया। आवां भवन्तं (ix) .......................... नेष्यावः।

पथिकः- धन्ये युवाम्, यत् मम (x) .......................... सहायतां कुरुथः।

मञ्जूषा : | वाहनम्, तीव्रगत्या, जनाः, आवाम्, अपरिचितस्य, चिकित्सालयम्, सहायताम्, कारयानेन, आगच्छति, मार्गम् |

## खण्डः-'ग' ( अनुप्रयुक्त-व्याकरणम् ) ( 35 )

5. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कृत्वा लिखत - 1×3=3

(i) काकः <u>शरण+अर्थम्</u> चटकायाः समीपम् अगच्छत्।

(ii) जनाः <u>परोपकारं</u> कृत्वा प्रसीदन्ति।

(iii) पुस्तके षष्ठः पाठः <u>सु+उक्तोनाम्</u> अस्ति।

6. (अ) विकल्पेभ्यः उचितं शब्दरूपं चित्वा वाक्येषु रिक्तस्थानानि पूरयत - ½×6=3

(क) जनकः ..................... उपहारम् आनयति।

(i) रामेण (ii) रामम्

(iii) रामाय (iv) रामे

(ख) हे .....................! त्वं कुत्र गच्छसि?

(i) लता (ii) लते!

(iii) लताः (iv) लताम्

(ग) ..................... रसः मधुरः भवति।

(i) फलेन (ii) फलाय

(iii) फलात् (iv) फलस्य

(घ) जनाः ..................... स्नानं कुर्वन्ति।

(i) नद्याम् (ii) नद्या

(iii) नद्यः (iv) नद्याः

(ङ) ..................... सह अहमपि गमिष्यामि।

(i) भवतः (ii) भवता

(iii) भवन्तम् (iv) भवते

(च) माता ..................... बालकौ पश्यति।

(i) गच्छन् (ii) गच्छन्तः

(iii) गच्छन्तौ (iv) गच्छन्तम्

(आ) उचितं-सर्वनामपदं चित्वा रिक्तस्थानानि पूरयत - (1×3=3)

(क) कक्षायां ..................... चित्राणि सुन्दराणि सन्ति।

(i) सर्वम् (ii) सर्वे

(iii) सर्वाः (iv) सर्वाणि

(ख) अद्य ..................... परीक्षा अस्ति।

(i) अस्मान् (ii) अस्मभ्यम्

(iii) अस्माकम् (iv) अस्मासु

(ग) भवान् ..................... नगरे वसति?

(i) कस्य (ii) कस्मिन्

(iii) कस्मै (iv) कस्मात्

7. (अ) कोष्ठके प्रदत्तसंङ्ख्यां संस्कृतपदेन रिक्तस्थानयोः लिखत - (1×2=2)

(क) मम पुस्तके .............................. (12) पाठाः सन्ति।

(ख) मम कक्षायां .............................. (46) छात्राः सन्ति।

(आ) उचितं संङ्ख्यावाचकं पदं विकल्पेभ्यः चित्वा लिखत - (½×2=1)

(क) मम परिवारे .............................. पुरुषाः सन्ति।

(i) त्रयः (ii) तिस्रः

(iii) त्रीणि (iv) त्रि

(ख) मम .............................. भगिनी अस्ति।

(i) एक (ii) एकः

(iii) एका (iv) एकम्

8. मञ्जूषायां प्रदत्तैः अव्ययपदैः रिक्तस्थानानि पूरयत - (1×3=3)

(i) ............................... चटकायाः गृहम् नष्टम् अभवत्।

(ii) काकस्य गृहम् ............................... नष्टम् अभवत्।

(iii) तौ ............................... अभ्रमताम्।

**मञ्जूषा** | अपि, इतस्ततः, एकदा |

9. रेखाङ्कितपदेषु उपसर्गं पृथक् कृत्वा योजयित्वा वा लिखत – 1×3=3

(i) गुरुः छात्रान् आ+दिशति।

(ii) छात्राः पाठम् अवगच्छन्ति।

(iii) गुरुः प्रसन्नताम् अनु+भवति।

10. रेखाङ्कितपदेषु प्रयुक्तां विभक्तिं तत्कारणं च लिखत – 1×5=5

(i) बालः मित्रेण सह क्रीडति।

(ii) खगाः नीडं प्रति गच्छन्ति।

(iii) वृक्षैः विना जीवनं न सम्भवति।

(iv) ग्रामं परितः क्षेत्राणि सन्ति।

(v) जलस्य अपव्ययेन अलम्।

11. अधोलिखितेषु समस्तपदेषु समासस्य नामानि लिखत – 1×3=3

(i) बालसभा (ii) पुष्पफलानि (iii) कार्यकुशलः

12. विकल्पेभ्यः उचितं धातु रुपं चित्वा वाक्येषु रिक्तस्थानानि पूरयत – 1×5=5

(क) जनाः सद्गुणैः एव .....................।

(i) शोभते (ii) शोभेते

(iii) शोभन्ते (iv) शोभामहे

(ख) वयं मिलित्वा एव .....................।

(i) स्थास्यामि (ii) स्थास्यामः

(iii) स्थास्यावः (iv) स्थास्यति

(ग) तौ एकं सुन्दरं गृहम् .....................।

(i) अपश्यत् (ii) अपश्यन्

(iii) अपश्यत (iv) अपश्यताम्

(घ) यूयं स्वपाठं .....................।

(i) स्मरत (ii) स्मर

(iii) स्मरतम् (iv) स्मरताम्

(ङ) मनुष्याः ज्ञानं प्राप्तुम् तत्पराः .....................।

(i) भवेत् (ii) भवेताम्

(iii) भवेयुः (iv) भवेयम्

13. अधोलिखितेषु वाक्येषु प्रकृति-प्रत्ययौ संयोज्य विभज्य वा लिखत - 1×4=4

(i) शिशुः दुग्धं <u>पीत्वा</u> क्रीडति।

(ii) माता दानं <u>प्र+दा+ल्यप्</u> प्रसीदति।

(iii) <u>धावन्</u> बालकः अपतत्।

(iv) छात्रः गुरुं <u>नम्+क्त्वा</u> पठति।

## खण्डः-'घ' (पठित-अवबोधनम्) (35)

14. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत - 5

महात्मा विठोवा एकस्मात् नगरात् बहिः कुटीरं निर्माय वसति स्म। अनेके भक्ताः तस्य दर्शनाय आगत्य तं स्वगृहम् आगन्तुम् आमन्त्रयन्ति स्म। एकदा एकः दर्शनार्थी नागरिकः रात्रिभोजाय तं महात्मानं प्रार्थयत्। महात्मा विठोवा तस्य निवेदनं स्वीकृतवान्। सः यदा भोजनाय तस्य जनस्य गृहम् अगच्छत्। सः कपाटम् आवृत्य कुत्रचित् गतः आसीत्। महात्मा विठोवा भोजनं विना एव कुटीरं प्रत्यागच्छत्। रात्रौ च बुभुक्षितः एव अतिष्ठत्।

(I) एकपदेन उत्तरत - ½×2=1

(क) महात्मा विठोवा किं स्वीकृतवान्?

(ख) कः रात्रिभोजाय महात्मानं प्रार्थयत्?

(ii) पूर्णवाक्येन उत्तरत - 1×2=2

(क) महात्मा विठोवा कुत्र वसति स्म?

(ख) भक्ताः किं कुर्वन्ति स्म?

(iii) निर्देशानुसारम् उत्तरत - ½×4=2

(क) 'नागरिकः' इति विशेष्यपदस्य विशेषणपदं किम्?

(i) दर्शनाय (ii) दर्शनार्थी

(iii) महात्मा (iv) निवेदनम्

(ख) 'निशायाम्' इति अर्थे गद्यांशे किं पर्यायपदं प्रयुक्तम्?

(i) रात्रौ (ii) निवेदनम्

(iii) बुभुक्षितः (iv) भोजनाय

(ग) 'सः यदा भोजनाय अगच्छत्' अस्मिन् वाक्ये अव्ययपदं किम्?

(i) सः (ii) यदा

(iii) भोजनाय (iv) अगच्छत्

(घ) 'वसतिस्म' इति क्रियापदस्य कर्तृपदं किम्?

(i) नागरिक: (ii) विठोवा

(iii) भक्ता: (iv) स्वगृहम्

15. अधोलिखितं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत - 5

निन्दन्तु नीतिनिपुणा: यदि वा स्तुवन्तु,
लक्ष्मी: समाविशतु गच्छतु वा यथेष्टम्।
अद्यैव वा मरणमस्तु युगान्तरे वा,
न्यायात्पथ: प्रविचलन्ति पदं न धीरा:।।

(I) एकपदेन उत्तरत - (½×2=1)

(क) का समाविशतु गच्छतु वा?

(ख) के निन्दन्तु स्तुवन्तु वा?

(ii) पूर्णवाक्येन उत्तरत - (1×2=2)

(क) मरणं कदा भवतु?

(ख) धीरा: किं न कुर्वन्ति?

(iii) निर्देशानुसारम् उत्तरत - (½×4=2)

(क) 'प्रविचलन्ति' इति क्रियापदस्य कर्तृपदं किम्?

(i) न्यायात् (ii) पथ:

(iii) पदम् (iv) धीरा:

(ख) 'जीवनम्' अस्य पदस्य किं विलोमपदं श्लोके प्रयुक्तम्?

(i) अद्यैव (ii) मरणम्

(iii) अस्तु (iv) युगान्तरे

(ग) 'प्रविचलन्ति पदं न धीरा:' अस्मिन् वाक्ये अव्ययपदं किम्?

(i) प्रविचलन्ति (ii) पदम्

(iii) न (iv) धीरा:

(घ) 'सत्यपथ:' अस्य पदस्य किं पर्यायपदं श्लोके प्रयुक्तम्?

(i) न्यायात्पथ: (ii) समाविशतु

(iii) स्तुवन्तु (iv) यथेष्टम्

16. अधोलिखितं संवादं पठित्वा प्रश्नानाम् उत्तराणि लिखत - 5

प्रणव: - व्याकरणस्य प्रसिद्ध: ग्रन्थ: क: अस्ति क: च तस्य रचयिता?

प्रज्ञा – 'अष्टाध्यायी' इति व्याकरणस्य प्रसिद्धः ग्रन्थः अस्ति। पाणिनिः च तस्य प्रणेता आसीत्।

आचार्यः – साधु, युष्माभिः अतीव मनोरञ्जिका ज्ञानवर्धिनी च इयं प्रश्नोत्तरी आयोजिता। अनया खलु संस्कृतस्य सामान्यः परिचयः प्राप्यते। संस्कृत भाषा विश्वस्य प्राचीनतमा भाषा अस्ति। अस्माकं संस्कृते सभ्यतायाः च मूलम् अस्याम् एव निहितम् अस्ति।

सर्वे छात्राः – वयम् एतां मधुरां भाषां सदैव रक्षिष्यामः। (½×2=1)

(I) एकपदेन उत्तरत –

(क) 'अष्टाध्यायी' इति कस्य ग्रन्थः अस्ति?

(ख) छात्रैः का आयोजिता?

(ii) पूर्णवाक्येन उत्तरत – (1×2=2)

(क) प्रणवः किं प्रश्नं पृच्छति?

(ख) संस्कृतभाषायां किं निहितम् अस्ति?

(iii) निर्देशानुसारम् उत्तरत – (½×4=2)

(क) 'रचयिता' अस्य पदस्य स्थाने किं पर्यायपदं संवादे प्रयुक्तम्?

(i) पाणिनिः (ii) प्रणेता

(iii) आयोजिता (iv) प्राचीनतमा

(ख) 'परिचयः' इति पदस्य विशेषणपदं किमस्ति?

(i) सामान्यः (ii) संस्कृतस्य

(iii) संस्कृतेः (iv) सभ्यतायाः

(ग) 'अस्याम् एव निहितम् अस्ति।' अस्मिन् वाक्ये अव्ययपदं किम्?

(i) अस्याम् (ii) एव

(iii) निहितम् (iv) अस्ति

(घ) 'रक्षिष्यामः' इति क्रियापदस्य कर्तृपदं किम्?

(i) आचार्यः (ii) छात्राः

(iii) वयम् (iv) सर्वे

17. मञ्जूषायां प्रदत्तपदैः भावार्थे रिक्तस्थानानि पूरयित्वा भावार्थं लिखत – 1×4=4

(अ) जननी जन्मभूमिश्च स्वर्गादपि गरीयसी।

भावार्थः – जन्मभूमिः (i) ..................... इव अस्ति। जन्मभूमिः माता इव जनान्

पालयति। अस्याः स्थानं (ii) ..................... अपि उच्चतरम् अस्ति।

(आ) मा भ्राता भ्रातरं द्विक्षत्।

भावार्थः - जनेषु (i) ..................... भवेत् न तु द्वेषः। केनापि सह (ii) ..................... मा कुरुत। परस्परम् मिलित्वा वसेयुः।

मञ्जूषा - | स्वर्गात्, ईर्ष्याम्, भ्रातृभावः, माता |

18. अधोलिखितौ श्लौकौ पठित्वा उचितपदैः अन्वयं पूरयत - (½×8=4)

(अ) गर्जति शरदि न वर्षति वर्षासु निःस्वनो मेघः।
नीचो वदति न कुरुते न वदति सुजनः करोत्येव।।

अन्वयः - मेघः शरदि (केवलं) (i) ..................... वर्षति न। (ii) .................... (सः) निःस्वनः (वर्षति) नीचः (iii) .................. एव कुरुते न, (iv) ............... करोति वदति न।

(आ) जाड्यं धियो हरति सिञ्चति वाचि सत्यं,
मानोन्नतिं दिशति पापम् अपाकरोति।
चेतः प्रसादयति दिक्षु तनोति कीर्तिं
सत्सङ्गतिः कथय किं न करोति पुंसाम्।।

अन्वयः - सत्सङ्गतिः धियः जाड्यं (i) ..................... वाचि सत्यं सिञ्चति, मानोन्नतिं दिशति, (ii) ..................... अपाकरोति, चेतः (iii) ..................... दिक्षु कीर्तिं तनोति कथय (सत्सङ्गतिः) (iv) ..................... किं न करोति?

19. अधोलिखितानि वाक्यानि कथाक्रमानुसारं लिखत - (1×5=5)

(क) अन्ते स्वार्थी काकः लज्जितः अभवत्।

(ख) वर्षाकाले काकस्य गृहं नष्टम् अभवत्।

(ग) ग्रीष्मकाले चटकायाः गृहं नष्टम् अभवत्।

(घ) अभिमानी काकः तस्यै शरणं न अयच्छत्।

(ङ) उदारहृदया चटका तस्य सहर्षं स्वागतम् अकरोत्।

20. अधालिखितेषु कथनेषु रेखाङ्कितपदानि आघृत्य प्रश्न-निर्माणं कुरुत - (1×5=5)

(क) <u>क्रोधेन</u> कार्यं न सिध्यति।

(ख) <u>अनुशासनहीनः</u> दण्डनीयः भवति।

(ग) काकस्य गृहं <u>वर्षायां</u> नष्टम् अभवत्।

(घ) <u>जलस्य</u> अभावात् कृषिः न भवति।

(ङ) भवभूतिः <u>उत्तररामचरितम्</u> अरचयत्।

21. अधोलिखितानां पदानाम् उचितार्थैः सह मेलनं कुरुत - (½×4=2)

| | |
|---|---|
| (क) निरामयाः | (i) असत्यम् |
| (ख) पण्डितान् | (ii) शक्तिः |
| (ग) अनृतम् | (iii) रोगरहिताः |
| (घ) बलम् | (iv) विदुषः |